# ९. विभक्तिमाला ।

धर्मो जयति नाधर्मः, सत्यं जयति नानृतम् ।
क्षमा जयति न क्रोधो, देवो जयति नासुरः ।। **प्रथमा** ।।

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ।। **द्वितीया** ।।

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ।। **तृतीया** ।।

विद्या विवादाय धनं मदाय
खलस्य शक्तिः परपीडनाय ।
साधोस्तु सर्वं विपरीतमेतद्
ज्ञानाय दानाय च रक्षणाय ।। **चतुर्थी** ।।

तैलाद्रक्षेद् जलाद्रक्षेद् रक्षेत् शिथिलबन्धनात् ।
मूर्खहस्ते न दातव्यम् एवं वदति पुस्तकम् ।। **पञ्चमी** ।।

नरस्याभरणं रूपं रूपस्याभरणं गुणः ।
गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ।। **षष्ठी**।।

व्यसने मित्रपरीक्षा शूरपरीक्षा रणाङ्गणे भवति ।
विनये भृत्यपरीक्षा दानपरीक्षा च दुर्भिक्षे ।। **सप्तमी** ।।


आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर ।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते ।। **सम्बोधनम्**।।


**रामो** राजमणिः सदा विजयते **रामं** रमेशं भजे
**रामेणा**भिहता निशाचरचमू **रामाय** तस्मै नमः ।
**रामान्नास्ति** परायणं परतरं **रामस्य** दासोऽस्म्यहम्
**रामे** चित्तलयः सदा भवतु मे भो **राम** मामुद्धर ।।

### श्लोक: -१

१. प्रथमान्तपदानि लिखत ।

२. जालरेखाचित्रं पूरयत ।








### श्लोक: -२

१. द्वितीयान्तपदानि लिखत ।

२. सुभाषिते क्रियापदं किम्?

३. जालरेखाचित्रं पूरयत ।




### श्लोक: -३

१. तृतीयान्तपदानि लिखत ।

२. समानार्थकशब्दान् मेलयत ।

| | |
|---|---|
| विनोद: | दुरभ्यास: |
| मूर्ख: | शयनम् |
| निद्रा | मनोरञ्जनम् |
| व्यसनम् | मूढ: |

३. एकवाक्येन उत्तरं लिखत ।

१. धीमतां काल: कथं गच्छति?

२. मूर्खाणां काल: कथं गच्छति?

### श्लोक: -४

१. चतुर्थ्यन्तपदानि लिखत ।

२. स्तम्भपूरणं कुरुत ।

| किम् | किमर्थम् | |
|---|---|---|
| | खलस्य | सज्जनस्य |
| विद्या | | |
| धनम् | | |
| शक्ति: | | |

३. एकवाक्येन उत्तरं लिखत ।

१. साधो: विद्या किमर्थं भवति ?

२. कस्य शक्ति: परपीडनाय भवति ?

### श्लोक: -५

१. पञ्चम्यन्तपदानि लिखत ।


२. जालरेखाचित्रं पूरयत ।




### श्लोक: -६

१. षष्ठ्यन्तपदानि लिखत ।

२. जालरेखाचित्रं पूरयत ।



**श्लोक: –७**

१. सप्तम्यन्तपदानि लिखत ।

२. स्तम्भपूरणं कुरुत ।

परीक्षा

| कस्य ? | कदा ? |
|---|---|
| मित्रस्य | |
| शूरस्य | |
| भृत्यस्य | |
| दानस्य | |

**श्लोक: –८**

१. सम्बोधनान्तपदानि लिखत ।

२. 'सूर्य' इत्यस्य शब्दस्य कृते अमरपङ्क्तिं लिखत।

**श्लोक: –९**

१. 'राम' इति शब्दस्य का विभक्ति: वाक्ये प्रयुक्ता इति लिखत ।

१. राजमणि: राम: सदा विजयते ।
२. अहं रामं भजे ।
३. रामेण निशाचरचमू: अभिहता ।
४. तस्मै रामाय नम: ।
५. रामात् परतरं परायणं न अस्ति ।
६. अहं रामस्य दास: अस्मि ।
७. मे (मम) चित्तलय: सदा रामे भवतु ।
८. भो राम, (त्वं) माम् उद्धर ।

• सर्वश्लोकानां सरलार्थं माध्यमभाषया लिखत ।

**• अधोदत्तेषु श्लोकेषु उक्तां विभक्तिम् अधोरेखितां कुरुत ।**

रविश्चन्द्रो घना वृक्षा नदी गावश्च सज्जना: ।
एते परोपकाराय लोके देवेन निर्मिता:।। (प्रथमा)

नमामि शारदां देवीं विद्यारम्भे सुमङ्गलाम् ।
नरस्तस्या: प्रसादेन पाण्डित्यं लभते सदा ।।(द्वितीया)

दरिद्रता धीरतया विराजते
कुभोजनं चोष्णतया विराजते।
कुरूपता शीलगुणेन राजते
कुवस्त्रता शुभ्रतया विराजते।। (तृतीया)

दानाय लक्ष्मी: सुकृताय विद्या
चिन्ता परेषां सुखवर्धनाय ।
परावबोधाय वचांसि यस्य
धन्यस्त्रिलोकीतिलक: स एव ।। (चतुर्थी)

पादपानां भयं वातात् पद्मानां शिशिराद्भयम् ।
पर्वतानां भयं वज्रात् साधूनां दुर्जनात् भयम् ।।(पञ्चमी)

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं भूषणै: किं प्रयोजनम् ।।(षष्ठी)

विदेशेषु धनं विद्या व्यसनेषु धनं मति: ।
परलोके धनं धर्म: शीलं सर्वत्र वै धनम् ।।(सप्तमी)

वृक्ष: फलान्वितो भाति वृक्षं धूनयते कपि: ।
वृक्षेण वार्यते ताप: जलं वृक्षाय दीयते ।।
वृक्षात् पतन्ति पर्णानि वृक्षस्य प्रसरो महान्
वृक्षे खगा निकूजन्ति वृक्ष धन्योऽसि भूतले ।।

I746FH

**अस्ति (✓) वा नास्ति (×) इति लिखत ।**

| मम समीपे | वर्गे | गृहे | ग्रन्थालये |
|---|---|---|---|
| लेखनी | चित्रफलकम् | दूरदर्शनम् | संस्कृतकथापुस्तकम् |
| लेखनपुस्तिका | दिनदर्शिका | सङ्गणक: | सम्भाषणसन्देश: (संस्कृतमासिकम्) |
| शब्दधातुरूपावलि: | उत्पीठिका | कपाटिका | संस्कृतशब्दकोष: |
| शब्दकोष: | आसन्द: | शीतकपाटिका | सुधर्मा (संस्कृतदैनिकम्) |
| पाठ्यपुस्तकम् | सुधाखण्ड: | दर्पण: | अमरकोष: |
| द्विचक्रिका | फलकमार्जनी | दण्डदीप: | संस्कृतिकोष: |